**Code No.: MS-01**

Total No. of Questions : 11 | Total No. of Printed Pages : 4

# स्नातकपरीक्षाः– २०१५

## बि.ए. – विद्वन्मध्यमा – प्रथमवर्षम्

## शास्त्रम् – सामान्यपत्रिका

### भागः – I, पत्रिका – I

### विषयः – प्रथमभाषा संस्कृतम्

**दिनाङ्कः –** 25.3.2015 | **गरिष्ठाङ्काः – १००**

**समयः –** 10.00 A.M. to 1.00 P.M. | Max. Marks – 100

---

### भागः–1

**I.** अधोनिर्दिष्टानां प्रश्नानां योग्यमुत्तरं चयनीयम्। **10 × 1 = 10**

१. प्रजाप्रभुत्वे एतद्बलमेव बलम्।

(अ) धनबलम् (आ) सैन्यबलम्

(इ) युक्तिबलम् (ई) संख्याबलम्

२. कस्याश्चिदपि भाषायाः विकासाय इयन्तः अंशा आवश्यकाः।

(अ) त्रयः (आ) सप्त

(इ) पञ्च (ई) षट्

३. ईदृशैर्दशभिः जगतीह किं न साध्यते?

(अ) कलहायमानैः (आ) मिलितैः

(इ) निद्राणैः (ई) धावद्भिः

४. निष्क्रियनिरुपयोगिजनानां समीपे एव अयं भवति।

(अ) गौः (आ) समयः

(इ) देवः (ई) घटः

५. स्वस्यैव प्रचारः स्वयमेव येन क्रियेत स ईदृशो भवेत्।

(अ) सम्मानभाक् (आ) धनभाक्

(इ) उपहासभाक् (ई) प्रचारभाक्

६. स्यूते इदमासीत्।
(अ) पत्रम् (आ) धनम्
(इ) वारि (ई) पर्णम्

७. अरण्यमध्ये अयं नैव भवति।
(अ) वृक्षः (आ) पक्षी
(इ) तण्डुलः (ई) व्याघ्रः

८. तीर्थक्षेत्राणि अटन् पथिकः सूर्यास्तसमये ईदृशः अभवत्।
(अ) सुदृढः (आ) श्रान्तः
(इ) मार्गभ्रष्टः (ई) नष्टः

९. रामदासकर्तृकपूजावसरे अयं प्रविशति गृहम्।
(अ) गृहस्थः (आ) ब्रह्मचारी
(इ) देवः (ई) सन्यासी

१०. कपोतान् जालबन्धनतः अयं मोचितवान्।
(अ) काकः (आ) व्याघ्रः
(इ) मूषकः (ई) वृद्धः

**II. द्वयोः श्लोकयोः अभिप्रायं विवृणुत।** **2 × 4 = 8**

१. विश्वस्य कर्ता भुवनस्य गोप्ता कश्चिद् भवेद्वा न भवेन्न जाने।
तथापि तस्मै विदधे प्रणामान् विचारमूलाय सदा जनानाम्।।

२. धिनोति यन्मूढजनं विपश्चित् यत्सेव्यते शूरवरश्य भीरुम्।
वृणोति यद्रूपवती कुरूपं तत्रास्ति हेतुर्धनमित्यवेहि।।

३. न शीतलत्वं द्युमणेर्मयूखे न चोष्णता चन्द्रमसो गभस्तौ।
न स्वादुता वारिनिधेश्च तोये न दोषिता तत्तदभावमात्रात्।।

**III. वाक्यद्वयेन वाक्यत्रयेण वा उत्तरत।** **10 × 2 = 20**

१. संस्कृतविदुषां परम्पराद्वयं निरूपयत।
२. C.B.S.E. पाठ्यक्रमानुसारेण पाठे संस्कृतस्य कथं हानिर्भवति?
३. अर्वाचीनकाले आयुर्वेदक्षेत्रे महती प्रगतिः कुतो न जाता?
४. संस्कृतभाषा कदा वायुवेगेन वर्धिष्यते?
५. महाव्याघ्रं श्रृगालः कथं वञ्चितवान्?
६. नीराजी वृद्धां प्रति किमुत्तवान्?

७. इन्द्रः किं ददमीति कुतः अवदत्?

८. बालचोरः कथं महाचोरः संवृत्तः?

९. कवेर्वचस्सु किं ग्राह्यं? कि न?

१०. यो मूर्खं रिरञ्जयिबति स कीदृश इति वर्णितम्?

**IV.** गद्यभागं पठित्वा प्रश्नानुत्तरत। **7 × 1 = 7**

धनं नैतिकता चेति द्वयोर्मध्ये बहुधा जयः भवति धनस्यैव। धननिमित्तं जनाः यत्किमपि कर्तुं सङ्कोच नानुभवन्ति। औपचारिकशिक्षणे यत्र सर्वकारीयं अनुदानं भवति तत्र स्वेन धनं प्राप्तव्य मित्ये तदर्थं वा केनचित् अव्यवहाराः क्रियन्ते चेत्। अविद्यमाना संख्या प्रदर्श्यते चेत् स्तरादिविषया कागदमात्रे एव तिष्ठेयुः।

१. कयोर्मध्ये धनस्यैव जयः भवति?

२. केन चित् के क्रियन्ते?

३. अविद्यमानाः काः प्रदर्श्यन्ते?

४. स्तरादि विषयाः कुत्र तिष्ठेयुः?

५. पत्रसर्वकारीयं अनुदानं भवति तत्र स्वेन किं प्राप्तव्यमिति आशा भवति?

६. धननिमित्तं जनाः यत्किमपि कर्तुं किं नानुभवन्ति?

७. अस्य गद्यभागस्य आशयः कः?

**V.** एकवाक्येन उत्तरत। **7 × 1 = 7**

१. रेवतीरजन्यौ स्यूतं कस्य हस्ते दत्तकत्यौ?

२. जबाला आश्रमे केषामनुचर्यां कुर्वन्ती आसीत्?

३. गुरुशिष्ययोर्मध्ये काभ्यां चङ्क्रूप्रवेशः न कार्यः?

४. पाठ्यविषयं विना अन्यविषयेषु कः सर्वज्ञः आसीत्?

५. क्रुद्धः इन्द्रः कस्मै शापं दातुमुद्युक्तः?

६. व्याधः तत्पत्नीं कुतस्ताडितुं प्रवृत्तः?

७. रामदासः पूजासमये देवाय किं नैवेद्यं समर्पितवान्?

**VI.** पुरुषत्रये वचनत्रये च रूपाणि लिखत। **2 × 2 = 4**

१. आह   २. त्यजन्ति

**VII.** विग्रहवाक्यं लिखत। **2 × 2 = 4**

१. कविकुलविनाशाय   २. सद्गुणसन्निपातकरणे



-अनुवर्तते

**Code No.: MS-01**

## भागः–2

**VIII.** उचितेन योजयत। **5 × 1 = 5**

| | | | |
|---|---|---|---|
| १. | कुशूलः | अ) | स्वर्गद्वारम् |
| २. | अन्त्येष्टिः | आ) | शिलाटङ्कः |
| ३. | घट्टिका | इ) | धान्यसङ्ग्रहपात्रम् |
| ४. | मल्लिका | ई) | गोधूमपेषणम् |
| ५. | सरयूः | उ) | और्ध्वदेहिकक्रिया |

**IX.** एकवाक्येन उत्तरत। **5 × 1 = 5**

१. गोलको नाम कः जनः?

२. ठक्कुरः कः?

३. डिण्डिमपण्डितः कुतः कुप्रसिद्धः?

४. गुणकर्मशः चातुर्वर्ण्यं कः मनुते?

५. येषां माता नास्ति तेषा माता का भवति?

**X.** वाक्यद्वयेन वाक्यत्रयेण वा उत्तरत। **10 × 2 = 20**

१. सौम्यदेवस्य गुरुकुले विशाखः एकदा गुरुं किमपृच्छत्?

२. सूतवर्यं कः कुत्र धातयामास?

३. स्वप्ने दृष्टा विशाखमाता तं प्रति किमब्रवीत्?

४. विशाखस्य पिता मल्लिकां कथं प्राप्तवान्?

५. दासानां वासीनां च विषये विशाखस्य कीदृशः भावः जातः?

६. ठक्कुरेण आनीतानि भूर्जपत्राणि कीदृशान्यासन्?

७. डिण्डिमपण्डितः इति नाम तस्यकुतः युज्यते?

८. मुकुरमन्दिरं कः कस्यै कुत्र निर्मितवान्?

९. पुस्तकलेखनान्ते सूतः विशाखं कुतः प्रणमति?

१०. ठक्कुरेण निर्मापितः श्रीकृष्णदेवालयः कीदृशः आसीत्?

**XI.** पञ्चषैर्वाक्यैरुत्तरत। (द्वयोरेव) **2 × 5 = 10**

१. वैद्यः चिरजीवी कीदृशः आसीत्?

२. लेखन्याः पृष्टभागे मयूरपिच्छं कुतो निबध्यते?

३. निधिदत्तः कानि वस्तूनि विशाखं प्रति प्रदर्शितवान्?